नं० ४७९९

नाम - पारस्करीय संस्कार रत्नाकरे स्वस्ति वाचन प्रयोगः

कर्त्ता ×

पत्र २५ पत्राणि सं० ×

विषयः सूत्रपद्धतिः

© Dharmartha Trust J&K. Digitized by eGangotri

स्वस्तिवाचनप्रयोगः संस्काररत्नाकरे पारस्करीये

४७९९

4799
F.015

© Dharmartha Trust J&K. Digitized by eGangotri

प्राधान्येनयजुर्वैदिनां ॥ पुराग्याहवाचनपद्धतिः वेदचतुष्कमंत्रसंवलिता ॥ अस्यश्लोकसंख्या त्रिशती ३०८

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ

ॐ श्रीगणेशाय नमः ॥ ॐ अथ स्वस्तिवाचनं कारिकायां स्वस्तिवाचनमत्रोक्तं दृष्टादृष्टकर्मसु केषुचित् अदृष्टमपि शा
स्त्रेऽस्मिन्मंगलार्थमुदीरितमिति आश्वलायनगृह्यपरिशिष्टे स्वस्तिवाचनमृद्धिपूर्त्तेष्वृद्धिर्विवाहादिरपत्यसंस्का
रः प्रतिष्ठापनं पूर्त्तं तत्कर्मणोराद्यन्तयोः कुर्यादिति अन्यत्रापि अन्यस्मिन्नपि सर्वत्र शुभे कर्मणि नोदिते वाच
नीया द्विजाः सर्वे वेदशास्त्रपरायणा इति व्यासः संपूज्य गन्धमाल्याद्यैर्ब्राह्मणान्स्वस्ति वाचयेत् धर्मकर्मणि
मांगल्ये संग्रामाद्भुतदर्शने इति निर्णयसिंधौ मदनः गर्भाधानादिसंस्कारेष्विष्टापूर्त्तेकृतेष्वपि नांदीश्राद्धं पुरा
कार्यं कर्मादौ स्वस्तिवाचनमिति तच्च गणपतिपूजनोत्तरं नांदीश्राद्धोत्तरं वा यथाचारं कार्यम् अथ कलशलक्षणं
हैमं वा राजतं वापि ताम्रं मृन्मयजं तथा अकालमव्रणं चैव सर्वलक्षणसंयुतं पंचाशांगुलवैपुल्यमुत्सेधे षो
डशांगुलं द्वादशांगुलकं मूलं मुखमष्टांगुलं स्मृतमिति पंचाशदंगुलवैपुल्यमिति मध्ये तिर्यग्मानेन समं

© Dharmartha Trust J&K. Digitized by eGangotri

ह्र

ताद्धायेचदशांगुलमितमर्थः अथमृदः अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदादिति समयदेराजद्वाराच्च
गोष्ठाच्चमृदमानीयनिक्षिपेत् इति अथसर्वौषधयः कारिकायां शंखपुष्पीवचाकुष्ठंवालकोनागकेशरमिति
ग्रंथांतरेत्वन्याश्चप्रोक्ताः अथपंचपल्लवाः न्यग्रोधोडुंबराश्वत्थप्लक्षचूतजम्बूतथैवचेति अथपंचरत्नानि कनकंकु
लिशंमुक्तापद्मरागंचमौक्तिकमिति अलाभेसर्वरत्नानांहेमंसर्वत्रयोजयेदिति अथहेमाद्रिपारिजातादिषु
सर्वेषुमहानिबंधेषुस्वस्वस्तिवाचनप्रयोगोभिहितः परंतुतेष्वपिमिथः कश्चित्कश्चिद्विरोधोऽस्ति अतोयथाशिष्ट
ष्टाचारेतेभ्यः संगृह्यप्रयोगोलिख्यते सपत्नीकोयजमानः प्राङ्मुखउपविश्यतद्दक्षिणतः प्राङ्मुखंसंस्कार्यंचोप
वेश्यतद्दक्षिणतउदङ्मुखान्स्वगमान्ब्राह्मणानुपवेशयेत् अथवास्वयंपत्नीसंस्कार्यसहितउदङ्मुखउपविश्य
स्ववामभागेप्राङ्मुखान्विप्रानुपवेशयेत् ततः सुमुखश्चेत्यादिपठित्वाकुशयवाक्षतसहितंजलंगृहीत्वादेशकालौ

© Dharmartha Trust J&K. Digitized by eGangotri

३

संकीर्त्तिकरिष्यमाणेऽमुककर्मांगत्वेनस्वस्तिवाचनंकरिष्यंतिसंकल्प्यकलशस्थापनंकुर्यात् तत्रकलशद्व
ॐ यस्थापनमुक्तंहारीतेन प्रस्थयान्योपरिस्थाप्यंपूर्णंहिकलशद्वयमिति शौनकेनतैककुंभस्थापनमुक्तं
२ विप्रकुंभमपांपूर्णंपिहिताननमर्चितमिति अत्रकारिकारादिभिराहृतत्वाद्विछावाशैकपवकुंभंस्थाप-
2 नीयः तद्यथा प्रणवस्यपरब्रह्म ऋषिः दैवीगायत्रीछंदः परमात्मादेवताप्रतिमंत्रमादौविनियोगः मही
द्यौरितिभूमिंस्पृष्ट्वा ॐमहीद्यौःइतिमंत्रस्यमेधातिथिर्गायत्रीद्यावापृथिवीभूमिस्पर्शनेविनियोगः ॐम
हीद्यौःपृथिवीचनइमंयज्ञंमिमिक्षतांपिपृतांनोभरीमभिः ओषधयइतिमंत्रस्यअथर्वपुत्रभिषगृषिरनु
ष्टुप्छंदःओषधिदेवतायवप्रक्षेपणेविनि ॐओषधयःसमवदंतसोमेनसहराज्ञायस्मैकृणोतिब्राह्मणस्तं
राजन्पारयामसीतियवान्प्रक्षिप्य आजिघ्रकलशेतिमंत्रस्यकुत्सरुविदऋषिःमहापंक्तिछंदःगोदे २

३ रा२

© Dharmartha Trust J&K. Digitized by eGangotri

वताकलशस्थापनेविनियोगः ॐआजिघ्रकलशंमह्यात्वाविशन्त्विन्दवः पुनरूर्जानिवर्तस्वसानः सहस्रंधुक्ष्वोरुधा
रापयस्वतीपुनर्माविशताद्रयिः इतिकलशंसंनियाय वरुणस्योत्तम्भनमसीतिमंत्रस्यविवस्वानृषिः यजुश्छंदः व
रुणोदेवताजलपूरणेविनियोगः ॐवरुणस्योत्तम्भनमसिवरुणस्यस्कंभसर्जनीस्थोवरुणस्यऋतसद
न्यसिवरुणस्यऋतसदन्मसिवरुणस्यऋतसदनमासीद इतिजलेनापूर्य त्वांगंधर्वाइतिमंत्रस्यविवस्वान्
ऋषिः अनुष्टुप्छंदः सोमोदेवतागंधप्रक्षेपणेविनि० ॐत्वांगंधर्वाअखनंस्त्वामिंद्रस्त्वां [illegible]हस्पतिः
त्वामोषधेसोमोराजाविद्वान्यक्ष्मादमुच्यत इतिगंधं ॐयाओषधीरितिमंत्रस्याथर्वणभिषगृषिः अनु
ष्टुप्छंदः ओषधिर्देवतासर्वौषधिप्रक्षेपेविनियोगः ॐयाओषधीःपूर्वाजातादेवेभ्यस्त्रियुगंपुरा मनैनु
बभ्रूणामहं शतंधामानिसप्तच इतिसर्वौषधीः ॐकाण्डात्काण्डादितिमंत्रस्याग्निरृषिः अनुष्टुप्

© Dharmartha Trust J&K. Digitized by eGangotri

छ्दूर्वाहद्कोदेववाद्दूर्वाप्रदेपणेविनियोगः ॐकाण्डाकांडात्प्ररोहन्तिपरुषःपरुषस्परि एवानोदूर्वेप्रतनुसह
स॰र स्रेणशतेनच इतिदूर्वा अश्वत्थेवइतिआथर्वणऋषिः अनुष्टुप्छंदः भिषगोषधयोदेवतापंचपल्लवप्रदेप
३ णेविनियोगः ॐअश्वत्थेवोनिषदनंपर्णेवोवसतिष्कृता गोभाजइत्किलासथयत्सनवथपूरुषं इतिपंचप
3 ल्लवान् ॐस्योनापृथ्वीतिमंत्रस्यमेधातिथिऋषिः गायत्रीछंदः पृथिवीदेवतामृत्तिकाप्रदेपणेविनियो
गः ॐस्योनापृथिविनोभवानृक्षरानिवेशनी यच्छानःशर्मसप्रथाः इतिपंचसप्तवामृदः ॐयाः फलि
नीरित्याथर्वणानुष्टुप् भिषगोषधयः देवताफलप्रदेपणेविनियोगः ॐयाः फलिनीर्याअफलाअपु
ष्पायाश्चपुष्पिणीः बृहस्पतिप्रसूतास्तानोमुंचन्त्वंहसः इतिफलं परिवाजपतीत्यस्यसोमऋषिः
गायत्रीछंदः अग्निर्देवतापंचरत्नप्रदेपणेविनियोगः ॐपरिवाजपतिःकविरग्निर्हव्यान्यक्रमीत् दधद्रत्ना ३

रो॰

© Dharmartha Trust J&K. Digitized by eGangotri

निदाश्रुषे इति पंचरत्नानि हिरण्यगर्भ इत्यस्य हिरण्यगर्भ ऋषिः त्रिष्टुप्छन्दः प्रजापतिर्देवता हिरण्यप्रदेपणे

विनियोगः ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् सदाधार पृथिवीं द्यामुतेमां कस्मै दे

वाय हविषा विधेम इति हिरण्यं युवासुवासा इति विश्वामित्र ऋषिस्त्रिष्टुप्छन्दो सूर्यो देवता वासपरिधाने वि

नियोगः ॐ युवा सुवासाः परिवीत आगात् स उ श्रेयान्भवति जायमानः तं धीरासः कवय उन्नयन्ति स्वाध्यो

मनसा देवयन्तः इति रक्तसूत्र रक्तयवलवस्त्रेण वेष्टय पूर्णादर्वीति मंत्रस्य विवस्वान ऋषिः अनुष्टुप्छन्दः

इन्द्रो देवता धान्यपूरित पात्रेण कलशापिधाने विनियोगः ॐ पूर्णादर्वि परापत सुपूर्णा पुनरापत वस्नेव वि

क्रीणावहा इषमूर्जं शतक्रतो इति धान्यपूर्णपात्रं कलशे निदध्यात् ॐ तत्वा यामीति शुनः शेफ ऋ

षिः त्रिष्टुप्छन्दः वरुणो देवता वरुणावाहने विनियोगः ॐ तत्वा यामि ब्रह्मणा वन्दमान स्तदाशास्ते यजमा

© Dharmartha Trust J&K. Digitized by eGangotri

ह्य१

स०र०
५
4

नोहविर्भिः अहेडमानोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीः इतिवरुणमावा ॐमनोजूतिरिति
प्रतिष्ठामंत्रमुच्चार्यकलशेवरुणः सुप्रतिष्ठितोवरदोभवेन्यत्नैः प्रतिष्ठाप्यकलशेविष्ण्वादिदेवतावामा
वाहने कलाःकलाहिदेवानांदानवानांकलाःकलाः विश्वकर्मनिर्मितोयेनकलशस्तेनकथ्यते कलशस्य
मुखेविष्णुर्ग्रीवायांतुमहेश्वरः मूलेतस्यस्थितोब्रह्मामध्येमातृगणाःस्मृताः कुक्षौतुसागराःसप्तस
प्तद्वीपावसुंधरा अर्जुनीगोमतीचैववेदभागासरस्वती कावेरीवृद्धवेणाचगंगाचैवमहानदी तापीगो
दावरीचैवमाहेंद्रीनर्मदातथा नदाश्चविविधाजातानद्यःसर्वास्तथापराः पृथिव्यांयानितीर्थानिकल
शस्थानितानिवै शांतिःपुष्टिश्चगायत्रीसावित्रीकलशेस्थिता ऋग्वेदोथयजुर्वेदःसामवेदस्तथर्व
णः अंगैश्चसहिताह्येतेकलशंतुसमाश्रिताः सर्वेसमुद्राःसरितःसरांसिसजलानिच आयांतुमम ८

© Dharmartha Trust J&K. Digitized by eGangotri

पूर्णसर्थेडरितक्षयकारकाः ततो विष्वादिदेवताभ्यो नमः मंत्रेण षोडशोपचारैः पंचोपचारैर्वा पूज्यं केचित्कल
शे वरुणमावाह्य पूजयंति ततो मंत्रैः कलशं प्रार्थयेत् देवदानवसंवादे मथ्यमाने महोदधौ उत्पन्नोसि तदा कुंभ
विधृतो विष्णुना स्वयं ततो ये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः त्वयि तिष्ठंति भूतानि त्वयि प्राणाः प्रतिष्ठिताः शि
वः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः त्वयि तिष्ठंति सर्वेपि यतः काम
फलप्रदाः त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदेति ततो ब्राह्मणान् गं
धादिभिः संपूज्य स्वस्तिवाचनार्थं युष्मानहं वृणे इति मंत्रेण सर्वान् पृथग्वा प्रत्येकं गोत्राद्युच्चार्य त्वामहं वृणे इति
वृणुयात् अथवा वरणमात्रं कृत्वा गंधाः पांत्विति काले गंधादिभिरर्चयेत् ततः अवनिकृतजानुमंड
लः कमलमुकुलसदृशमंजलिं शिरस्यापाय दक्षिणेन पाणिना सुवर्णकलशं धारयित्वा आशिषः प्रार्थये

© Dharmartha Trust J&K. Digitized by eGangotri

से.र.
५

ॐ दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च तेनायुः प्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु अस्त्विति विप्रा ब्रू
युः शिवा आपः सन्तु इति ब्राह्मणहस्ते जलदाने ३ सन्तु शिवा आप इति प्रतिवचने सौमनस्यमस्तु इति पु
ष्पदाने अस्तु सौमनस्यं अक्षतं चारिष्टं चास्तु इत्यक्षतान् ॐ अक्षतं चास्त्वरिष्टं च ॐ गन्धाः पान्तु इति गन्धेनार्चने
ने ॐ सुमङ्गल्यं चास्त्विति प्रतिवचने ॐ अक्षताः पान्तु आयुष्यमस्तु ॐ पुष्पाणि पान्तु सौश्रियमस्तु ॐ ता
म्बूलानि पान्त्वैश्वर्यमस्तु दक्षिणाः पान्तु बहुदेयं चास्तु इति प्रतिवचने दीर्घमायुः शान्तिः पुष्टिस्तुष्टि
श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रं बहुधनं चायुष्यं चास्त्वित्युक्त्वा सर्ववेदयज्ञक्रियाकरणकर्मारम्भाः शुभाः
शोभनाः प्रवर्तन्तामिति ॐकारमादिं कृत्वा ऋग्यजुः सामाथर्वाशीर्वचनं बहुऋषिमतं बहुऋषिमतं समनु
ज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये इति यजमानः वाच्यतामिति विप्राः ॐ द्रविणोदा द्रविणसस्तु ५

© Dharmartha Trust J&K. Digitized by eGangotri

रस्य द्रविणोदाः सनरस्य प्रयंसत् द्रविणोदा वीरवतीमिषं नो द्रविणोदा रासते दीर्घमायुः १ सविता पश्चा
त्सविता पुरस्तात्सवितोत्तरात्तात्सविताधरात्तात् सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमा
युः २ नवो नवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रम् भागं देवेभ्यो विदधात्यायन्प्र चन्द्रमास्तिरते दीर्घ
मायुः ३ उच्चा दिवि दक्षिणावन्तो अस्थुर्ये अश्वदाः सह ते सूर्येण हिरण्यदा अमृतत्वं भजन्ते वासोदाः सोम
प्रतिरन्त आयुः ४ इति ऋग्वेदिनः पठेयुः द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत नेष्ट्रादृतुभिरिष्य
त १ सविता त्वा सवानां सुवतामग्निर्गृहपतीनां सोमो वनस्पतीनाम् बृहस्पतिर्वाच इन्द्रो ज्यैष्ठ्याय
रुद्रः पशुभ्यो मित्रः सत्यो वरुणो धर्मपतीनाम् २ न तद्रक्षांसि न पिशाचास्तरन्ति देवानामोजः प्र
थमजं ह्येतत् यो बिभर्ति दाक्षायणं हिरण्यं स देवेषु कृणुते दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः ३

© Dharmartha Trust J&K. Digitized by eGangotri

उच्चातेजातमंधसोदिविसद्भूम्यादंदेउग्रंशंशर्मममहिश्रवः ४ उपास्मैगायतानरः पवमानायेन्दवे अभिदेवां
स.र. इंऽऽ३यक्षते ५ इतियज्ञर्वैदिनः ॥ -१- ॥ ओंउच्चाताइयिजातमंधसाः। दिवाइसा १ द्भू २ मिया २३दं
६ दापि उग्रंशंशर्मा महा २३ यिश्रवा ३ स्तोषे २ ३४५ उपा ५ स्मै गाइया ३ तानाराः पाइवामा ३
6 ना यो २३ श्रा इम्मा ३ दा ३ आभिदेवाँ ऽऽ इयाक्षताउ। वा ३ ४५ अपनादेवसवितः ३५ होवा ३ह
क्रया ३ प्रजावा २३ न्ता वीः सौभगान् पराहू २३ ष्वा ३ होवाइहा प्रियऽऽ सू २३ ४५ वा ५५५ दक्षार
याया २ ३४ चंद्रमाश्राउवाप्स्वंतनाराउवा सुपर्णोयाउवा धावतेदिवि नमोहिराउवा एपनाइमायाउवा
पदविंदाउवा तिविद्युताः वित्तम्माश्राउवास्यरोदसिमा ३४३ यि।उ २३ ४५ ई।डा। देवोदेवाइद्रविणोदाः
पूर्णोविवष्ठ्यासिचं। उदा १ सिंचां २ ध्वमुपवाष्पृणध्वं। आदिद्वोदे २ वउहते। इडा ३४३ उ २३४५ ई।डा ६

© Dharmartha Trust J&K. Digitized by eGangotri

वेल्लर गीं आजमानांय श्यामत्वा ह वि ना रं यमा हु रज हं जहं ज्योतिर्यद ८

इतिसामगाः ॐयातारात्रिःसवितेदंजुषंतांप्रजापतिर्निधिपतिर्नोअग्निः तस्माद्विष्णुःप्रजयासंरराणोयजमा
नायद्रविणंदधात्वग्निः तस्माविष्णुःप्रजयासंरराणोयजमानायद्रविणंदधातु येनदेवंसवितारंपरिदेवा
अवारयन् तेनेदंब्रह्मणस्पतेपरिराष्ट्रायधत्तन अहोरात्राभ्यांनक्षत्रेभ्यःसूर्याचंद्रमसाभ्यां भद्राहमस्मा
भ्यंराजन्वकक्षमतवक्षाय उद्वायतनमरुणंसुपर्णंमध्येदिविंददत्रिः इत्यथर्ववेदिनः यजमानः व्रतनि
यमतपःस्वाध्यायक्रतुदमदानविशिष्टानांसर्वेषांब्राह्मणानांमनःसमाधीयतांविप्राः समाहितमनसःस्म
यजमानः प्रसीदन्तुभवन्तःविप्राः प्रसन्नाःस्मः यजमानः शांतिरस्तु तुष्टिरस्तु पुष्टिरस्तु वृद्धिरस्तु अ
विघ्नमस्तु आयुष्यमस्तु आरोग्यमस्तु शिवंकर्मास्तु कर्मसमृद्धिरस्तु पुत्रसमृद्धिरस्तु वेदसमृद्धि
रस्तु शास्त्रसमृद्धिरस्तु धनधान्यसमृद्धिरस्तु इष्टसंपदस्तु अनिष्टनिरसनमस्तु यत्पापंतत्प्रतिहत

© Dharmartha Trust J&K. Digitized by eGangotri

स॰र॰

मस्तु पञ्चेयस्तदस्तु उत्तरे: कर्मण्यविघ्नमस्तु उत्तरोत्तरमहरहरभिवृद्धिरस्तु उत्तरोत्तराः क्रियाः शुभाः शोभ
नाः संपद्यन्तां तिथिकरणमुहूर्तनक्षत्रग्रहलग्नसंपदस्तु तिथिकरणमुहूर्तनक्षत्रग्रहलग्नादिदेवताः प्री
यन्तां तिथिकरणे समुहूर्ते नक्षत्रे सलग्ने सदैवते प्रीयेतां दुर्गापाञ्चाल्यौ प्रीयेतां अग्निपुरोगा विश्वेदेवाः
प्रीयन्तां इन्द्रपुरोगा मरुद्गणाः प्रीयन्ताम् वसिष्ठपुरोगा ऋषिगणाः प्रीयन्तां माहेश्वरीपुरोगा उमामा
तरः प्रीयन्तां अरुन्धतीपुरोगा एकपत्न्यः प्रीयन्तां विष्णुपुरोगाः सर्वे देवाः प्रीयन्तां ब्रह्मपुरोगाः सर्वे वेदाः
प्रीयन्तां ब्रह्म च ब्राह्मणाश्च प्रीयन्तां श्रीसरस्वत्यौ प्रीयेतां श्रद्धामेधे प्रीयेतां भगवती कात्यायनी प्रीयतां भ
गवती माहेश्वरी प्रीयतां भगवती ऋद्धिकरी प्रीयतां भगवती वृद्धिकरी प्रीयतां भगवती पुष्टिकरी प्रीयतां
भगवती तुष्टिकरी प्रीयतां भगवन्तौ विघ्नविनायकौ प्रीयेतां सर्वाः कुलदेवताः प्रीयन्तां सर्वा ग्रामदेव

© Dharmartha Trust J&K. Digitized by eGangotri

ताःप्रीयेंतां सर्वाइष्टदेवताःप्रीयेंतां हताब्रह्मद्विषः हताश्चपरिपंथिनः हताश्चविघ्नकर्तारः शत्रवःपराभ
वंयांतुः शाम्यंतुघोराणि शाम्यंतुपापानि शाम्यंत्वीतयः शुभानिवर्द्धंतां शिवाआपःसन्तु शिवाऋत
वःसंतु शिवाअग्नयःसंतु शिवाआहुतयःसंतु शिवाओषधयःसंतु शिवा अतिथयःसंतु अहोरात्रे
शिवेस्यातां ओंशंवःकनिक्रदद्देवःपर्जन्योअभिवर्षतोओषधयः प्रतियीयंतां शंनोद्यावापृथिवीशंप्रजा
भ्यः शंनोअस्तुद्विपदेशंचतुष्पदे इतिऋग्वेदिनःपठेयुः निकामेनिकामेनःपर्जन्योवर्षतुफलवत्यो
नओषधयःपच्यंतांयोगक्षेमोनःकल्पताम् इतियजुर्वेदिनः तत्र ३४ नादेविधं ववाःपर्जन्योब्रह्म
णस्या २१ तीः पुत्रैर्भ्रातृभिरदितिर्नुपातु २१ जाः इडाराध्य १ त्रा मणेवा २३ चा ३४ ३ः ३ २३ ४५ ३
डा ३ सामगाः गणास्त्वोपगायंतुमारुताःपर्जन्यघोषिणःपृथक् सर्गावर्षस्यवर्षतोवर्षंतुपृथिवीम

© Dharmartha Trust J&K. Digitized by eGangotri

सं.र.
८

8

नु इत्यथर्ववेदिनः यजमानः शुक्रांगारकबुधबृहस्पतिशनैश्चरः राहुकेतुसोमसहिताआदित्यपुरोगाः
सर्वेग्रहाः प्रीयन्तां भगवान्नारायणः प्रीयतां भगवान्पर्जन्यः प्रीयतां भगवान् स्वामीमहासेनः प्री
यतां पुरोनुवाक्ययायत्पुण्यंतदस्तु याज्ययायत्पुण्यंतदस्तु वषट्कारेणयत्पुण्यंतदस्तु प्रातःसूर्योद
येयत्पुण्यंतदस्तु एतत्कल्याणयुक्तंपुण्यंपुण्याहंवाचयिष्ये इतियजमानः वाच्यतामितिविप्राः
यजमानः ब्राह्मंपुण्यंमहर्यच्चसृष्ट्युत्पादनकारकंवेदवृक्षोद्भवंनित्यंतत्पुण्याहंब्रुवंतुनः भोब्राह्म
णास्तिथिकर्मणेमेदमध्यास्वरेणाविदर्ध्यात पुण्याहमितिविप्रास्तथैवत्रिर्ब्रूयुः उद्गातेवशकुने
सामगायसिब्रह्मपुत्रइवसवनेषुशंससि वृषेववाजिशिशुमतीरपीत्यासर्वतोनः शकुनेभद्रमाव
दविश्वतोनः शकुनेपुण्यमावद इतिऋग्विदिनः पुनंतुमादेवजनाः पुनंतुमनसाधियः पुनंतु ८

© Dharmartha Trust J&K. Digitized by eGangotri

विश्वाभूतानिजातवेदः पुनीहिमा इतियजुर्वेदिनः पुनानः सोमाधारा २२४ या आपोवसानो अर्षस्यारत्न

धायोनिमृतस्यसीदसिउत्सोदेवोहिरा २१ हा ३ ऊहा३उवा उत्सोदेवोहिरा २१ हा ३ ऊहा३उवा एपयो ऊ३होवा हो ५२ डा ३

तिसामगा पुनंतुमादेवजनाः पुनंतुमनसाधिया पुनंतुविश्वाभूतानिपवमानः पुनातुमा इत्यथर्ववेदि

नः यजमानः पृथिव्यामुहूतायांतुयत्कल्याणंपुराकृतं ऋषिभिः सिद्धगन्धर्वैस्तत्कल्याणंब्रुवंतुनः मम

सकुटुंबस्य कल्याणं भवंतोब्रुवंत्विति क्रमेणमेंद्रमध्योच्चस्वरेणविब्रूयात् कल्याणमितिविप्राः त

थैवत्रिर्ब्रूयुः अयाः सोममत्स्विंद्रप्रपाहिकल्याणीर्जायासुरणंगृहेते यत्रारथस्यबृहतोनिधानंविमोच

नंवाजिनोदक्षिणावदितिऋग्वेदिनः पठेयुः यथेमांवाचंकल्याणीमावदानिजनेभ्यः ब्रह्मराजन्याभ्यांशूद्रा

यचार्याय चारणायच प्रियोदेवानांदक्षिणायैदातुरिहभूयासमयंमेकामः समृध्यतामुपमादोनम

© Dharmartha Trust J&K. Digitized by eGangotri

त इतियजुर्वेदिनः का ५ या। नश्रा २ यिवा २ श्राभुवात्।क्ल।तीसदाहयःस।सा।ॐ२होहायि।कया २२
से.२. शवा ३।हयोहोइड्डया २ वारबौ ३५ हायि २ इतिसामगाः विश्वजित्कल्याणेमापरियेहिकल्या
५ णेहियाश्चसर्वेनोरत्नवनष्यायवनस्व इत्यथर्ववेदिनः साणरस्पत्तयाश्चहिर्महालक्ष्यादिभिःकृ
ता सेवूर्णोसुप्रवांभोवनतामहिमुवुर्वतनः ममसकुडं मेणःश्चहिंमवंतीवुवेतितिक्रमेणमेड
9 मध्यो० यात् अध्यतामितित्रिर्विप्राः अध्यामत्सोमेमनुयामवानमानोमेत्रेसरथेहोयपाते यशा
नयकेंमघुगोष्ठेतराभूतांशीश्राश्विनोऽकाममप्राः इत्स्रवेदिनः पठेयुः सत्रस्यश्चद्विरस्यगान्मज्यो
तिरमृताग्रभूम दिवेपृथिव्याः अध्याहहामाविदामदेवान्स्वर्ज्योतिः यजुश्रहोवा २= ५ हो २ वा
श्रागन्मज्योतिः २ श्रगन्मज्योतिः अमृताश्रभूम २ अमृतग्रभूम तरिदांपृथिव्याअध्याहहामा २ ५

© Dharmartha Trust J&K. Digitized by eGangotri

तरिक्षं पृथिवीमुत्याहुहाम् दिवमेतद्विद्वादत्याहुहामा।३। अविदामदेवान्।३। समुदेवैरमन्महि २ अहो

वा २ अहोइवा। एवजेंगीनी २३ ४५।ः इतिसामवेदिनः अथमित्रोनियस्त्रावयम्स्वामृतासुवर्द्धमानःसुजन्मा

अदब्धोसुभ्राजमानोहिवजितोयावसीणि अथाथर्ववेदिनः स्वस्तिर्या विनाशाख्यापन्यकल्याणहृद्धि

दा विनायकप्रियानित्यंतांस्वस्तिंनोस्वस्तिभवतुवंतनः ममसहकुटुं० मणः स्वस्तिभवंतोभुवंतिजिके मे

मेद्रमयोःपात् स्वस्तित्रिर्विप्राः स्वस्तिदिह्निप्रेयथेप्रेष्ठारेयकस्वत्यनियावाममेति सानोअमामो

अरणेनियातुस्वस्तिवेशामभवतुदेवगोपा इत्याविदिनः स्वस्तिनइन्द्रोवृद्धश्रवाः स्वस्तिनः पूषाविश्ववेदाः

स्वस्तिनस्तार्क्ष्योअरिष्टनेमिः स्वस्तिनोबृहस्पतिर्दधातुइति यजुर्वेदिनः त्रातारमिन्द्रमवितार

मिन्द्राम् २३ हवहवेसुहवांशुरमी २ इंद्राम् हवामिनुशक्रंपुरुहू तमी २ इन्द्राम् इदंधुहो

© Dharmartha Trust J&K. Digitized by eGangotri

से॰र॰ वापिः मघवा। वा २२४ पि। न्त्र्। २ वा ५ पिंद्रा २५३ः। इतिसामवेदिनः स्वस्तिमात्रउतपित्रेनोअस्तुस्वस्ति
१० गोभ्योजगतेपुरुषेभ्यः विश्वंसुभूतंसुविदत्रंनोअस्तुज्योगेवदृशेमसूर्यमित्यथर्ववेदिनः मृकंडुस्तनो
10 दायुर्येद्ववलोमशायोस्तथा आयुषानेनसंयुक्ताजीवेमशरदःशतमितियजमानः जीवंतुभवंतइतिब्राह्म
णाः शतंजीवशरदोवर्द्धमानः शतंहेमंतान्छतमुवसंतान्शतमिंद्राग्निसविताबृहस्पतिः शतायुषाह
विषेमपुनर्दइः इतिऋग्वेदिनः शतमिन्नुशरदोअंतिदेवायत्रानश्चक्राजरसंतनूनाम् पुत्रासोयत्रपितरो
भवंतिमानोमध्यारीरिषतायुर्गंतोः इतियजुर्वेदिनः आयुर्विश्वायुर्विश्वंविश्वमायुरश्निमहिस्वांत्वष्टरथी
नीयेस्मत्स्त्वः शतंजीवेमशरदोनयंते २२४५ इतिसामवेदिनः आयुरस्मैयेहिजातवेदःप्रजांत्वष्टरधिनि
धेह्यस्मै रायस्पोषंसवितरासुवास्मैशतंजीवातिशरदस्तवायं इत्यथर्ववेदिनः शिवगौरीविवाहेयाः १०

श्रीरामेनृपयात्मजे यनदस्मटहेयाश्रीरस्माकंसात्वसङ्गनीतियजमानः अस्लश्रीरितिविप्राः श्रियेजातः
श्रियग्रानिरियायश्रियवयोजरितृभ्योदधाति श्रियंवसानाअमृतत्वमायन्भवंतिसत्यासमिथ्यामितद्रौ इत्यृग्वेदि
नः मनसःकाममाकूतिंवाचःसत्यमशीमय पशूनां रूपमंनस्यरसोमयःश्रीःश्रयतांमयिस्वाहा ३
तियजुर्वेदिनः आयेतइवमत्ऽयरायाम् विश्वोदधिदिंम्रा २। सभा २ त्वाना वासनिजातोजमा नीयाजा १
सा २ प्रतिभागेनदी २ पिमः। प्रा २३ ती। भागोना ३ दो। ऊम्। थीमा ३ः। ७५२३४ वा। श्रिये १ इतिसामवे
दिनः एहयातुवरुणःसोमोअग्निर्बृहस्पतिर्वसुभिरेहयातु अस्यश्रियमुपसंयातसर्वउग्रस्यचेत्तुःसमनस
सजातानाः इतिअथर्ववे प्रजापतिर्लोकपालोधाताब्रह्मावदेवराट्। भगवान्शाश्वतोनित्यंनोरक्षतुसर्वतः
भगवान्प्रजापतिःप्रीयताम्। प्रजापतेनत्वदेतान्यन्योविश्वारूपानिपरितावभूव यत्कामास्तेजुहुमस्तंनो

© Dharmartha Trust J&K. Digitized by eGangotri

से·र·
११

अस्तु वयं स्याम पतयो रयीणाम् इति ऋग्वेदिनः प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव यत्का
मास्ते जुहुमस्तन्नो अस्त्वयममुष्य पितासावस्य पिता वयं स्याम पतयो रयीणां स्वाहा इति यजुर्वेदिनः
हाउइ। इमाः।२। प्रजाः।२। प्रजापतेः। होइ।२। प्रजापते। हा ३१ उ। वा २। प। हृदय २। प। हृदया ३१ उ।
वा।२। प्रजा रूपमजिनने ३। इडा २३ ४५॥ इति सामवेदिनः॥ प्रजापते साहूतो ब्रह्मणा वर्मणाहं कश्यप
श्यप ज्योतिषा वर्चसा च जरदष्टिः कृतवीर्यो विहायाः सहस्रायुः सुकृतश्चरेयमित्यथर्ववेदिनः आयुष्म
ते स्वस्तिमते यजमानाय दाशुषे श्रिये दत्ताशिषः सन्तु ऋत्विग्भिर्वेदपारगैः आयुष्मते स्वस्ति स्वस्तये वा
युमुपब्रुवामहे सोमं स्वस्ति भुवनस्य यस्पतिः बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवन्तु नः
इत्यृग्वेदिनः प्रति पन्थामपद्महि स्वस्तिगामनेहसं येन विश्वाः परि द्विषो वृणक्ति विन्दते वसु इति य ११

© Dharmartha Trust J&K. Digitized by eGangotri

जुर्वेदिनः त्यमूषु वाजिना ३४५ म। देवजूता २ ३४ म। सहावानतरुता ३।२ ५४ रथानाम। अरिष्टना २ ३४
यिमीम्: पृतना ३४ इजमाशुम्। स्वस्त। याइ। तार्क्ष्यामीहा ३ ४३ हु ३ वा ५ यिमा ६ ५६ इति सामवेदिनः
वेदस्वस्तिर्ईर्थेणः स्वस्तिः परस्पुर्वेदिः परस्तुनेः स्वस्ति ह विक्रुतेयक्षियायस्तकामास्तेदेवासोयज्ञमिमंजुषंतां
इत्यथर्ववेदिनः स्वस्तिवाचनकर्मसमृद्धिरस्तु इतियजमानः अस्त्वितिविप्राः अथप्राङ्मुखस्ययजमान
स्य। वामतःपत्न्याउपवेशने उदङ्मुखोस्थितोब्राह्मणःसहदर्भपल्लवपाणयोवरुमाणेर्मंत्रैर्द्विहस्तः
स्थितकलशपातितपात्रोदकेनसपत्नीकस्यसपरिवारस्ययजमानस्यमूर्द्धन्यभिषेकंकुर्युः मंत्रास्तु। आ
पोहिष्ठेतितिसृणांसिंधुद्वीपोगायत्र्यः त्रातारमिंद्रेतिपंचानांगर्गादयोऋषयःजगत्यादिनानाविधा
निछंदांसि। इंद्रादयोदेवताः इममेवरुणेतिपंचानांशुनःशेपादयोऋषयःगायत्र्यादीनिछंदांसिवरुण

© Dharmartha Trust J&K. Digitized by eGangotri

सं॰र॰ १२

12

दयोदेवताः भगप्रणेतरइतिमंत्रस्यविवस्वान्‌ऋषिः त्रिष्टुप्छंदः भगोदेवता वरुणस्योत्तंभनमितिमंत्रस्यवि
वस्वान् ऋषिः यजुश्छंदः वरुणोदेवता इदमापइतिमंत्रस्यविवस्वानऋषिः महापंक्तिश्छंदः आपोदेवताः
समुद्रायत्वेतिमंत्रस्यविवस्वानऋषिः यजुश्छंदः वायुःदेवता पुनंतुमाइतिमंत्रस्यविवस्वानऋषिः अ
नुष्टुप्छंदः अग्निर्देवता आप्यायस्वेतिमंत्रस्यगोतमऋषिः गायत्रीछंदः सोमोदेवता पवनय इतिमं
त्रस्यवैवस्वान्‌ऋषिः अनुष्टुप्छंदः सरस्वतीदेवता शिरोमेश्रीरितिवत्तुणंविवस्वानसाप्यऋषयःगा
यत्र्यादिछंदांसिब्रह्मादयोदेवताः देवस्यत्वेतिमंत्रस्यविवस्वानऋषिः बृहतीछंदः सवितादेवता सोमः
स्यत्वेतिमंत्रस्यवैवस्वान्‌ऋषिः यजुश्छंदः सोमोदेवताऽभिषेकेविनियोगः ॐआपोहिष्ठामयोभुवस्ता
नऊर्जेदधातनमहेरणायचक्षसे १योवःशिवतमोरसस्तस्यभाजयतेहनः उशतीरिवमातरः २तस्मा १२६

© Dharmartha Trust J&K. Digitized by eGangotri

अग्नेगमामवोयस्यत्वयायजित्वथ आपोजनयथाचनः २ त्रातारमिंद्रमवितारमिन्द्र ँ हवेहवे
सुहव ँ शूरमिंद्रं ह्वयामिशक्रंपुरुहूतमिंद्र ँ स्वस्तिनोमघवाधात्विंद्रः १ इन्द्रःसुत्रामास्ववाँ॥ऽ
अवोभिःसुमृडीकोभवतुविश्ववेदाः बाधतान्द्वेषोअभयंकृणोतुसुवीर्यस्यपतयःस्याम २ तस्यव
य ँ सुमतौयज्ञियस्यापिभद्रेसौमनसेस्याम ससुत्रामास्ववाँ॥ऽ इंद्रोअस्मेआराच्चिद्द्वेषःसनुतर्यु
योतु २ आमंद्रैरिंद्रहरिभिःयाहिमयूररोमभिः मात्वाकेचिन्नियमन्विन्नपाशिनोतिधन्वेवताँ २ऽइहि ४
एवेदिंद्रंवृषणंवज्रबाहुंवसिष्ठासोअभ्यर्चन्त्यर्कैः सनस्तुतोवीरवद्धातुगोमद्यूयंपातस्वस्तिभिःसदान ५
इमंमेवरुणश्रुधीहवमद्याचमृडय त्वामवस्युराचके १ तत्त्वायामिब्रह्मणावन्दमानस्तदाशास्तेय
जमानोहविर्भिः अहेडमानोवरुणेहबोध्युरुश ँ समानआयुः प्रमोषीः २ त्वंनोऽअग्नेवरुणस्य

© Dharmartha Trust J&K. Digitized by eGangotri

सं॰र॰ विद्वान्देवस्यहेडोअवयासिसीष्ठाः यजिष्ठोवह्नितमःशोशुचानोविश्वाद्वेषांꣳसिप्रमुमुग्ध्यस्मत् ३
१२ सत्वंनोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ अवयक्ष्वनोवरुणꣳरराणोवीहिमृडीकꣳसु
हवोनएधी ४ महीमूषुमातरꣳसुव्रतानामृतस्यपत्नीमवसेहुवेमतुविक्षत्रामजरंतीमुरूचीꣳ
13 सुशर्माणमदितिꣳसुप्रणीतिम् ५ भगप्रणेतर्भगसत्यराधोभगेमान्धियमुदवाददन्नः भग
प्रनोजनयगोभिरश्वैर्भगप्रनृभिर्नृवंतःस्याम ६ वरुणस्योत्तम्भनमसिवरुणस्यस्कंभसर्जनीस्थोव
रुणस्यऋतसदन्यसिवरुणस्यऋतसदनमसिवरुणस्यऋतसदनमासीद॥१॥ इदमापःप्रवहताव
द्यञ्चमलञ्चयत् यच्चाभिदुद्रोहानृतंयच्चशेपेअभीरुणम् आपोमातस्मादेनसःपवमानश्चमुञ्चतु १
समुद्रायत्वावातायस्वाहासरिरायत्वावातायस्वाहा अवस्यवेत्वावातायस्वाहाशिमिदायत्वावातायस्वा १२

© Dharmartha Trust J&K. Digitized by eGangotri

हा॥ १॥ पुनंतुमादेवजनाः पुनंतुमनसाधियः पुनंतुविश्वाभूतानिजातवेदः पुनीहिमा १ आप्यायस्वसमे
तुतेविश्वतः सोमवृष्ण्यं भवावाजस्यसंगथे १ यंवनयः सरस्वतीमपियंतिसस्रोतसः सरस्वतीतुपंचधासो
सोदेशेभवत्सरित् २॥ शिरोमेश्रीर्यशोमुखंत्विषिः केशाश्चश्मश्रूणि राजामेप्राणोऽअमृतꣳ सम्राट्च
क्षुर्विराट्श्रोत्रम् १ जिह्वामेभद्रंवाङ्महोमनोमन्युः स्वराड्भामः मोदाः प्रमोदाअंगुलीरङ्गानिमित्रंमेसहः॥ २
बाहूमेबलमिंद्रियꣳ हस्तौमेकर्मवीर्यं आत्माक्षत्रमुरोमम ३ पृष्टीर्मेराष्ट्रमुदरमꣳसौग्रीवाश्चश्रोणी
ऊरूअरत्नीजानुनीविशोमेंगानिसर्वतः ४ देवस्यत्वासवितुः प्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम् अ
श्विनोर्भैषज्येनतेजसेब्रह्मवर्चसायाभिषिंचामि सरस्वत्यैभैषज्येनवीर्यायान्नाद्यायाभिषिंचामिंद्रस्येंद्रिये
णबलायश्रियैयशसेभिषिंचामि १ सोमस्यत्वाद्युम्नेनाभिषिंचाम्यग्नेर्भ्राजसासूर्यस्यवर्चसेन्द्रस्येंद्रिये

© Dharmartha Trust J&K. Digitized by eGangotri

सं॰र॰ १७

स्रवंतैसेन्द्रस्पेंदियेसाद्गनाणाद्भुतपतिरेयन्तिदिशुस्वाहि ॥ एवमन्येपिस्वश लोकामेत्राणाहन्ना: ॥ ॐ
खरास्त्वामभिषिंचेत्तब्रह्मविष्णुमहेश्वरः ॥ वासुदेवोजगन्नाथस्तथासंकर्षणोविभुः १ प्रद्युम्नश्चानिरु
द्धश्च भवंतुविभवायते आखंडलोग्निर्भगवान्यमोवैनिर्ऋतिस्तथा २ वरुणः पवनश्चैव धनाध्यक्ष
स्तथाशिवः ब्रह्मणासहिताः सर्वेदिक्पालापांतुमेसदा ३ कीर्तिर्लक्ष्मीधृतिर्मेधापुष्टिःश्रद्धा
क्रियामतिः बुद्धिर्लज्जावपुःशांतिस्तुष्टिःकांतिश्चमातरः ४ एतास्त्वामभिषिंचंतुदेवपत्न्यःस
मागताः आदित्यश्चंद्रमाभौमोबुधजीवसितार्कजः ५ ग्रहास्त्वामभिषिंचंतुराहुकेतुश्चतर्पिताः
देवदानवगंधर्वायक्षराक्षसपन्नगाः ६ ऋषयोमनयोगावोदेवमातरएवच देवपत्न्योद्रुमानाना
गादैत्याश्चाप्सरसांगणाः ७ अस्त्राणिसर्वशस्त्राणिराजानोवाहनानिच औषधानिचरत्ना १७

© Dharmartha Trust J&K. Digitized by eGangotri

सं० र०
१५

निकालस्यावयवाश्रये ८ सरितः सागराः शैलास्तीर्थानि जलदा नदाः एतेत्वामभिषिंचंतु सर्वकामार्थसिद्धये इति पौराणमंत्रैश्चाभिषेकं कुर्युः ॐ अमृताभिषेकोऽस्त्वित्यभिषेको नैव कर्तव्यः परशुरामादयः केचिदत्राभिषेकं न कुर्वंति अस्य स्वस्तिवाचनस्य संपूर्णतासिध्यर्थमिमां हिरण्यं दक्षिणां विप्रेभ्यो दातुमहमुत्सृजे तेन ममेत्युक्त्वा विप्रेभ्यो दक्षिणादानं यजमानस्य तिलककरणं सुवासिनीभिश्च वर्द्धापनं नीराजनाशीः प्रयोगान्ते नववस्त्रदानादि मंगलं यथाचारं कार्यम् इति श्रीमन्महाराजाधिराजश्री[illegible]रणवीरसिंहभूपालाज्ञापितपारस्करीयसंस्काररत्नाकरे स्वस्तिवाचनप्रयोगः ॥ अथाग्निसंदीपनहृदकल्प [illegible] [illegible]ध्ययनानुसारी स्वस्तिवाचनप्रयोगः ॥ समाप्तम् ॥ शुभमस्तु हरिॐ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

15

© Dharmartha Trust J&K. Digitized by eGangotri